


WWJMRD 2021; 7(2): 72-75
www.wwjmrd.com
*International Journal Peer Reviewed Journal Refereed Journal Indexed Journal Impact Factor MJIF: 4.25 E-ISSN: 2454-6615*

**कुलदीपसिहः**
शोधच्छात्रः, धर्मशास्त्रविभागः,
श्री ला.ब.शा.रा.सं.विद्यापीठम्

**Correspondence:**
**कुलदीपसिहः**
शोधच्छात्रः, धर्मशास्त्रविभागः,
श्री ला.ब.शा.रा.सं.विद्यापीठम्

# संस्कारः

## कुलदीपसिहः

पूण्यभूमौ भारतवर्षे विभिन्नेषु भारतीयप्राचीनग्रन्थेषु संस्कारशब्दस्य प्रयोगः दरीदृश्यते। सृष्ट्यां मानवः सर्वोत्कृष्टो मन्यते । तस्य जीवनस्य उद्देश्यम् आत्मसाक्षात्कारो वर्तते । विधिपूर्वकं संस्कृतो मानवो दिव्यज्ञानमर्जित्वा आत्मसाक्षात्कारं कर्तुं प्रभवति । मानवस्य सम्पूर्णजीवनं संस्काराणां क्षेत्रं वर्तते। संस्काराणां प्रमुखं लक्ष्यं शरीरस्य शुध्दिः पवित्रता चास्ति । स्नानाचमनादिजन्याः संस्काराः देहे उत्पद्यमानानि जीवाः कल्पयन्ते । वस्तुतः मानवस्य कायिक- मानसिक- वाचिक परिशुद्ध्यर्थं धार्मिकक्रियानुष्ठानमेव संस्कारः। संस्करैः मानवः समाजस्यैकः पूर्णविकसितः सदस्यरूपेण परिगण्यते। संस्कारशब्दस्य अनेके समानार्थाः शब्दाः सन्ति । यथा - संस्करणं, परिष्करणं, विमलीकरणं, विशुद्धीकरणम्, इति ।
संस्कारशब्दस्य व्युत्पत्तिः यथा - 'सम्' उपसर्गपूर्वकं, 'कृञ् करणे' इति धातोः 'घञ्' प्रत्यये, अनन्तं च 'सुट्' योजिते संस्कारशब्दः निष्पद्यते । बहुष्वर्थेषु संस्कारशब्दस्य प्रयोगः दृश्यते परिष्करण–भूषण-प्रशिक्षण-संस्कृति-स्वशुद्धिक्रिया धार्मिकविधानादिषु विभिन्नेष्वर्थेषु प्रयुक्तोऽयं संस्कारशब्दः । शास्त्रान्तरेष्वपि अस्य स्वरुपं भिन्नतया वर्णितम् अस्ति यथा - वेदान्तिनां मते "देहे समुत्पद्यमानः स्नानाचमनादिजन्यजीवधर्मः संस्कारः। मीमांसादर्शने अस्य संस्कारशब्दस्य अर्थः यज्ञाङ्गभूत पुरोडाशादि शुद्ध्यर्थं प्रोक्षणविक्षणादिना सम्पन्ना भवति । नैयायिकमतम् यथा भावस्य व्यक्तिकरणार्थमात्मब्यञ्जन-शक्तिरेव संस्कारः इति । धर्मशास्त्रे तु मानवस्य कायिक–वाचिकपरिशुद्ध्यर्थं धर्मिकक्रियानुष्ठानेनात्मनि जायमानो धर्मविशेषः संस्कारः इति। दोषापनोदनपूर्वकं गुणाधानमेव संस्कार इति फलितम् ।
प्राचीनयुग पितृणामत्यधिका चिन्ता पुत्रस्य व्यक्तित्वविकासनार्थं वभूव "आत्मा पुत्रनामासि' इति शास्त्रवचनानुसारं पिता स्वयमेव पुत्ररूपेण जायते अयं सस्कारः। गर्भाधानात् अन्त्येष्टिपर्यन्तं द्विजमात्राणां सर्वे संस्काराः वैदिकमन्त्रैः भवन्ति । संस्कारेभ्यः एव मनुष्यः द्विजत्वं प्राप्नोति इति । संप्रति संस्कारस्य संख्याविषये विभिन्नग्रन्थेषु विभिन्नमतानि परिलक्ष्यन्ते । मनुना गर्भाधानादारभ्य अन्त्येष्टिपर्यन्तं त्रयोदशसंस्काराणां नामानि प्रोक्तानि ते च यथा – गर्भाधानम्, पुंसवनम्, सीमन्तोन्नयनम्, जातकर्म, नामकरणम् बहिर्निष्कमणम्, अन्नप्राशनम्, कर्णवेधनम्, चूडाकर्म, उपनयनम्, केशान्तः, समावर्त्तनम्, विवाहः, अन्त्येष्टिश्चेति । एषु केशान्तसंस्कारं विहायावशिष्टाः द्वादशसंस्काराः स्वीकृताः याज्ञवल्क्येन । तेन समावर्त्तनसंस्कारेण केशान्तसंस्कारस्यान्तर्भावः कृतः । परन्तु अधुना षोडाशसंस्काराणां प्रसिद्धिलोकेऽस्मिन् परिलक्ष्यते। व्यासस्मृतौ एतेषां षोडशसंस्काराणां नामानि प्रोक्तानि यथा-

**गर्भाधानं पुंसवनं सिमन्तो जातकर्म च ।**
**नाम क्रिया-निष्क्रमणोऽन्नासनं वपनक्रिया ।।**
**कर्णभेदो व्रतादेशो वेदारम्भक्रियाविधिः ।**
**केशान्तः स्नानमुद्वाहो विवाहाग्निपरिग्रहः ।।**
**त्रेताग्निसंग्रहश्चेति संस्काराः षोडशस्मृताः ।**
**नैवेताः कर्णभेदान्ता मन्त्रवर्ज क्रियाः स्त्रीयः ।।**
**विवाहो मन्त्रततस्तस्याः शुद्रस्या मन्त्रतो दश ।।**

गर्भाधानम्, पुंसवनम्, सीमन्तोन्नयनम्, जातकर्म, नामकरणम्, निष्क्रमणम्, अन्नप्राशनम्, चूडाकर्म, कर्णवेधः, व्रतादेशः, वेदारम्भः, केशान्तः, स्नानम्, उद्वाहः, विवाहाग्निपरियहः, वेताग्निसंग्रहः, आहवनीय, गार्हपत्य दक्षिणा इति । शूद्राणां स्त्रीणां च संस्काराः मन्त्रविहीनाः कृताः। स्त्रीसंस्कारविषये मनुना प्रोक्तम् -

**अमन्त्रिका तु कार्येयं स्त्रीणामावृदशेषतः ।**
**संस्कारार्थ शरीरस्य यथाकालं यथाक्रमम् ।।**

वैखानसमतेन अष्टादशसंस्काराः । अगिंरा मतेन पञ्चविंशतिसंस्काराः । गौतम मतेन चत्वारिंशत् संस्काराः सन्ति । बोधायनाचार्यैरपि सीमन्तोन्नयनानन्तरं गर्भिण्याः सप्तमे मासि विष्णुबलिः इति कश्चन चतुर्थः संस्कारः कथ्यते । अपि च ब्रह्मचारिणां वेदाध्ययनानन्तरं विवाहात् पूर्वं होतृ, शुक्रियं, उपनिषदं, गोदानं, सम्मितं चेति पञ्च वेदव्रतानि संस्कारत्वेन निर्दिष्टानि वर्तन्ते । केशान्तः इति संस्कारस्तु बोधायनाचार्यैः नोक्तः । तथा च उपनयनानन्तरं श्रावण्यां पौर्णमास्यां वेदोपाकरणं अथवा वेदारम्भः इति संस्कारोऽपि विहितः । एवं च षोडशसंस्कारा भवन्ति ।

**1. गर्भाधानसंस्कारः –**

शिशोर्जन्मनः प्राक् तदर्थः यः संस्कारः, स एव गर्भाधानसंस्कारः। अथवा शिशोर्मातुर्गर्भे बीजरूपेण प्रतिष्ठापनं गर्भाधानमुच्यते। अस्मिन् विषये मनुराह –

**वैदिकैः कर्मभिः पुण्यैर्निषेकादिर्द्विजन्मनाम् ।**
**कार्यः शरीरसंस्कारः पावनः प्रेत्य चेह च ॥**

गर्भाधानं परिभाषमाणो जैमिनिराह –
गर्भः सन्धार्यते येन कर्मणा तद् गर्भाधानमित्यनुगतार्थं कर्मनामधेयम् ।
महर्षि शौनकोऽपि प्रतिपादितवान् यत् यस्मिन् कर्मणि पुरुषेण निषिक्तो गर्भः स्त्रियां धार्यते तत् गर्भाधानं इत्युच्यते यथा–

**निषिक्तो यत्प्रयोगेण गर्भः सन्धार्यते स्त्रिया ।**
**तद् गर्भालम्भनं नाम कर्म प्रोक्तं मनीषिभिः ॥**

मनुयाज्ञवल्क्यादयः आचार्याः इदमेव कर्म निषेक् इति प्रतिपादयन्ति । गर्भाधान संस्कारस्य श्रेष्ठतम कर्त्तापतिः भवति। ब्रह्मपुराणे विषयेऽस्मिन् परिलक्षते ।
यथा –

**गर्भाधानदिसंस्कर्ता पतिः श्रेष्ठतमः स्मृतः ।**
**अभावे स्वकुलीनः स्यादवान्धवोऽन्यत्रगोत्रजः ।।**
**मृतोदेशान्तरगतोभर्ता स्त्रीययसंस्कृता।**
**देवरा वा गुरवोऽपि वश्यो वाऽपि समाचरेत्।।**

पुत्रोत्पत्त्या पिता पितृणां ऋणाद् मुक्तो भवति। तदुक्तं तैत्तिरीयसंहितायाम् –

**"जायमानो वै ब्राह्मणस्त्रिभिर्ऋणवान् जायते ब्रह्मचर्येण ऋषिभ्यो यज्ञेन देवेभ्यः प्रजया पितृभ्यः। एष वा अनृणी यः पुत्री यज्वा ब्रह्मचारी वा स्यादिति।"**

**2. पुंसवनसंस्कारः –**

गर्भधारणानन्तरं गर्भस्थशिशोः पुंसत्वं सम्पादनकारणात् पुंसवनसंस्कारः भवति । अत्र भिन्न भिन्न देवानां प्रार्थना भवति । यया प्रार्थनया गर्भस्थशिशुः पुष्टो भूत्वा पुत्ररूपेणप्राप्तो भवेत । प्रयोगपारिजाते जातुकर्ण्येन विरचितम् –

**द्वितीये तृतीये मासि पुंसवन सम्भवेत् ।**
**व्यक्ते गर्भे भवेत्कार्य सीमन्तै नसहितेन वा ।।**

परन्तु वृहस्पतिना वैधत्वं प्रतिपादितं यत् –

**तृतीये मासि कर्त्तव्यमृरैरन्यत्रशोभनम् ।**
**व्यक्तेश्चतुर्थे मासे तु कुमारस्य षष्ठेऽष्टमे ।।**

अवसरेऽस्मिन् गर्भिण्याः अङ्के जलेन पूर्णपात्रं निधाय गर्भरक्षायै पुत्रप्राप्तये च भगवतः देवानां च स्तुतिः भवति। तेन गर्भस्य रक्षा पुंस्त्वप्राप्तिश्च भवति ।

**3. सीमन्तोन्नयनसंस्कारः -**

गर्भधारणानन्तरं चतुर्थे मासे सीमन्तोन्नयनसंस्कारः भवति । सीमन्त उन्नियते यस्मिन् कर्मणि तत् सीमन्तोन्नयनम् । गृह्यसूत्रानुसारेण गर्भाधानस्य चतुर्थे पञ्चमे मासि सीमन्तोन्नयनसंस्कारः क्रियते। स्मृतिग्रन्थानुसारेण षष्ठे अष्टमे वा मासि संस्कारोऽयमनुष्ठीयते । वसिष्ठेनापि उक्तं यत्-

**"चतुर्थे सप्तमे मासि षष्ठे वाप्यष्टमे। सीमन्तसंस्कारं कारयेत्।"**

गर्भस्य रक्षायै संस्कारोऽयमिति प्रोक्तं वीरमित्रोदये –

**पत्न्याः प्रथमजं गर्भमत्तुकामाः सुदुर्भगाः।**
**आयान्ति काश्चिद् राक्षस्यो रुधिराशनतत्पराः॥**
**तासां निरसनार्थाय श्रियमावाहयेत्पतिः।**
**सीमन्तकरणी लक्ष्मीस्तामावहति मन्त्रतः॥**

**4. जातकर्मसंस्कारः –**

पूर्वक्ताः संस्काराः सर्वेऽपि गर्भसंस्कारः भवन्ति। परन्तु अयं जातकर्मसस्कारः पुत्र जन्मादनन्तरमेव कारयेत। जातकर्मसंस्कारः नवजातशिशोः संवर्धनार्थं तथा च तस्य परिपोषणार्थं भवति । एतस्मिन् नाभिवर्धनात्पूर्वं पञ्च ब्राह्मणैः वैश्वानरः अग्नेः स्तुतिः भवति । शिशोर्जन्मनः परं साक्षात् एवायं जातकर्मसंस्कारः सम्पाद्यते। शिशोः जन्मानन्तरं पिता नान्दीश्राद्धादिकं सम्पाद्य नाभिच्छेदनात् प्रागेव मन्त्रोच्चारणपुरःसरं सुवर्णशलाकया मधुसर्पिषोः प्राशनं कारयेत्। तदुक्तं मनुस्मृतौ –

**प्राङ्नाभिवर्धनात् पुंसो जातकर्म विधीयते।**
**मन्त्रवत् प्राशनं चास्य हिरण्यमधुसर्पिषाम्॥**

**5. नामकरणसंस्कारः –**

नामकरणं बालकस्य जन्मतः एकादशदिवसे अनुष्ठेयम्। यथाह योगीश्वरयाज्ञवल्क्यः -

**'अहन्येकादशे नाम''**

मनुना श्लोकोऽयं विरचितो यत् –

**नामधेयं दशम्यां तु द्वादश्या वास्यकारेयत् ।**
**पूण्ये तिथौ मुहूर्ते वा नक्षत्रे वा गुणान्विते ।।**

मदनरत्ने वृहस्पतिना यदुक्तम् –

**द्वादशे दशमे वाऽपि जन्मतोऽपि त्रयोदशे ।**
**षोडशे विशंतां चैव द्वात्रिंशद्वर्णतः क्रमात्।।**

मनुः जन्मतो दशमे द्वादशे वा दिवसे नामकरणसंस्कारं निर्दिशति। तदुक्तं मनुस्मृतौ –

**नामधेयं दशम्यां तु द्वादश्यां वाऽस्य कारयेत्।**

**पुण्ये तिथौ मुहूर्ते वा नक्षत्रे वा गुणान्विते॥**

**6. निष्क्रमणसंस्कारः -**
शिशोः जन्मतः चतुर्थे मासि वहिर्निष्क्रमणं कारयेत्।
**चतुर्थमासि निष्क्रमः** । इति योगीश्वरयाज्ञवल्क्येन विहितम् ।
तत्र निष्क्रमणं नाम सूर्यवेक्षणम् मनुनापि यत् व्यरचितम्-

**चतुर्थे मासि कर्त्तव्यं शिशो निष्क्रमणं गृहात् ।**

ज्योतिर्निबन्धे विकल्पव्यवस्थापरिलक्षिता यत्-

**तृतीये वा चतुर्थे वा मासि निष्क्रमणं भवेत् ।।**

यमेनापि तथैव वचनमेव स्पष्टीकृतं यथा –

**ततस्तृतीये कर्तव्यं मासि सूर्यस्य दर्शनम्।**
**चतुर्थमासि कर्तव्यं शिशोश्चन्द्रस्य दर्शनम्॥**

**7. अन्नप्राशनसंस्कारः –**
अन्नं प्राश्यते येन कर्मणा तदन्नप्राशनम् । षष्ठमासि अथवा माङ्गल्यकालविशेषे मासे अन्नप्राशनं करणीयमिति मनुना प्रोक्तम् । गृह्यसूत्रेषु स्मृतिषु च जन्मतः षष्ठे मासे शिशोः अन्नप्राशनसंस्कारो विहितः।

**घृतोदनं तेजस्कामः दधिमधु घृतमिश्रमन्नं प्राशयेत् ।**

इति आश्वलायनगृह्यसूत्रम् ।

**षष्ठे मासेऽन्नप्राशनम् ।**

इति पारशगृह्यसूत्रम् ।
सामान्यतः दधिमधुघृतमिश्रितमन्नं शिशवेऽन्नप्राशनाय प्रदीयते ।
व्यक्तित्वविकासे आहारशुद्धिरनिवार्या मन्यते। तदुक्तं छान्दोग्योपनिषदि -
**"आहारशुद्धौ सत्त्वशुद्धिः सत्त्वशुद्धौ ध्रुवा स्मृतिः स्मृतिलम्भे सर्वग्रन्थीनां विप्रमोक्षः"** इति ।

**8. चूडाकर्मसंस्कारः -**
'चूडा' नाम 'शिखा'। तस्याः स्थापनार्थं यत् कर्मानुष्ठानं क्रियते तत् चूडाकर्म। अथवा चूडा शरीरस्याग्रभागः शिरः इति यावत् तस्मिन शिरसि केशकर्तनादिकर्म चूडाकर्म अपरमेकः संस्कारविशेषः । यस्यानुष्ठानं प्रथमादिषु वर्षेषु अनुष्ठेयतया विहितमस्ति। यथा मनुस्मतौ –

**"चूडाकर्मद्विजातीनां सर्वेषामेवधर्मतः।**
**प्रथमेऽब्दे तृतीये वा कर्त्तव्यं श्रुतिचोदनात्।।"**

अतएव मनुस्मृतिमतानुसारेण चूडाकर्म प्रथमवर्षे तृतीयवर्षे वा विधेयम्। याज्ञवल्क्यस्मृतौ । । एवं विहितं यत् –

**चूडाकार्या यथाकूलम्** इति तत्र प्रत्येकं सम्वध्यते।
गृह्यसूत्रकारपारस्कराचार्येण –

**संवत्सरिकोऽयं चूडाकरणम् । तृतीये वाऽप्रतिहते ।**

इति सूत्रभ्यां प्रथमवर्षेसंपूर्णे । सति तृतीयवर्षस्य अल्पागमे वा चूडाकर्म उपदिष्टम्। पुनश्च पारस्करार्येण –

**यथा मङ्गलं वा सर्वेषाम्।**

चुडाकर्म' इत्यस्य नामान्तर चूडाकरणं, मुण्डनं चेति।

**9. कर्णवेधसंस्कारः –**
संस्कारोऽयं शिशुः जन्मतः तृतीये पञ्चमे वा वर्षे शभमुहर्ते क्रियते । अस्मिन् संसारे स्वर्णकामः षष्ठपुरुषे वा तप्तशलाकया कर्णयोः च्छेदनं करोति । तथैव तादृशमौषधं
लेपयति। तेन तत्र व्रह्ममयं न जायते ।
मदनरत्ने वसिष्ठश्रीधरौ –

**मासे षष्ठे सप्तमे वाष्टमे वा वेध्यौ कर्णो द्वादशे षोडशेऽर्हाः मध्येनाहुः पूर्वभागे न रात्रौ नक्षत्रे द्वन्दे तिथि वर्जयित्वा।।**

नाम्नैव संस्कारस्यास्य स्वरूपं स्पष्टं भवति। स्मृतिकारः देवलस्य मतेन –

**कर्णरन्ध्रे रवेश्छाया न विशेदग्रजन्मनः।**
**ते दृष्ट्वा विलयं यान्ति पुण्यौघाश्च पुरातनाः॥**

**10. विद्यारम्भसंस्कारः -**
मदनरत्नेनृसिंहः –

**अक्षरस्वीकृतिं कुर्यात्प्राप्ते पञ्चमहायने।**
**उत्तरायणे सूर्ये कुम्भमासं विवर्जयेत्।।**

सांस्कृतिकसंस्कारोऽयं यदा वालकस्य शिक्षाग्रहणयोग्यतागच्छति तदा शिक्षयाः आरम्भः। अर्थात् विद्यासंस्कारो भवति । यद्यपि क्रमानुसारं संस्करोऽयं उपनयने संस्कारात् प्रागेव आगच्छति। किन्तु इदमेव दृष्ट्वाऽर्वाचीनं संस्कारोऽयं विभिन्नेषु धर्मशास्त्रग्रन्थेषु विद्यारम्भः, अक्षरारम्भः, अक्षरस्वीकरणम्, अक्षरलेख्यम् इति नामान्तरं दृश्यते। विद्यारम्भस्यापरं नाम अक्षरारम्भ' इत्यस्ति। तेन प्रतीयते यद् वर्णमालायाः विकासयुगे संस्कारोऽयं प्रावर्तत इति।

**11. उपनयनसंस्कारः –**
उपनयनं नाम संस्कारविशेषः । उपनयनशब्दः 'उप'' उपसर्गात् नय् प्रायणो धातोः । ल्युट्प्रत्ययकृते निष्पद्यते तेन वेदाध्ययनाय आचार्यस्य समीपे नयनमिति उपनयनशब्दस्यार्थः । पुरा उपनयनस्य सम्यक महत्त्वमासीत्। अतः उपनयनसंस्कारः ब्राह्मणस्य गर्भाष्टमे वर्ष, क्षत्रियस्य गर्भैकादशे, वैश्यस्यगर्भ द्वादशे अनुष्ठेयः । इत्याह मनुः -

**गर्भाष्टमेऽब्दे कुर्वीत ब्राह्मणस्योपनायनम्।**
**गर्भादेकादशे राज्ञो गर्भात्तु द्वादशे विशः।।**

योगीश्वरयाज्ञवल्क्यस्य मतानुसारेण गर्भाष्टमे जन्माष्टमे वा ब्राह्मणस्योपनयनम् । अत्र इछया विकल्पः । राज्ञामेकादशे विशां द्वादशे इति । यथा याज्ञवल्क्यस्मृतौ –

**गर्भाष्टमेऽष्टमेवाब्दे व्रह्मणस्योपनयनम्।**
**राज्ञामेकादशे सैके विशामेके यथा कुलम्।।**

आश्वलायनापि उपनयनस्य कालानाह यथा –
**गर्भाष्टमेऽष्टमेवाऽब्दे पञ्चमे सप्तमेऽपि वा ।**

**द्विजत्वं प्राप्नुयाद् विप्रो वर्षत्वेकादशे नृपः ।।**

आपस्तम्बेन तदुक्तम्-

**"गर्भाष्टमषु ब्राह्मणमुपनयेतिति''।**

स्मृतिराह –

**गृह्योक्तकर्मणा येन समीपं नीयते गुरोः।**
**बालो वेदाय तद्योगाद् बालस्योपनयं विदुः॥**

**12. वेदारम्भसंस्कारः -**

उपनयनानन्तरं संहस्कारोऽयं जायते। आचार्यस्य सन्निधौ निवसनपूर्वकं वटुः स्वर्गप्रदायानुसारं रुग्यजुः साम अथर्वसु वेदष्वैकतममध्ययनं करोति। वेदारम्भो नामायं संस्कार: उपनयनसंस्कारानन्तरं वेदपाठस्यारम वेदपाठस्यारम्भं सूचयति।
याज्ञवल्क्यस्मृतिः –

**उपनीय गुरुः शिष्यं महाव्याहृतिपूर्वकम् ।**
**वेदमध्यापयेदेनं शौचाचारांश्च शिक्षयेत् ॥**
**यच्छाखीयैस्तु संस्कारैः संस्कृतो ब्राह्मणो भवेत्।**
**तच्छाखाध्ययनं कार्यमेवं न पतितो भवेत्॥**

**13. केशान्तसंस्कारः –**

वैदिकव्रतेषु क्षोरकर्म प्रधानकर्म आसीत्। वेदारम्भसंस्कारोपेक्षया केशान्तसंस्कारः प्राचीनतमः । संस्कारेऽस्मिन् प्रथमतः श्मश्रुकेशक्षौरं भवति । केचन गोदानसंस्कार : इति कथयन्ति। षोडश वर्षाणि अतीतानि यस्य सः एव कुमारस्य सप्तवर्षे केशान्त कर्म कुर्य्यात्। अथवा यस्मिन् पुरीय: आचारणम आचार सनिकृते कुर्यात्। केशान्तकर्मणामनन्तरं संवत्सरं यावत् ब्रह्मचर्याचरणं कुर्यात्। अथवा द्वादशरात्रं षडरात्रं वा अन्तत: त्रिरात्रं ब्रह्मचर्यचरणं कुर्यात् ।
मनुस्मृतौ केशान्तसंस्कारस्य समयो निर्धार्यते –

**केशान्तः षोडशे वर्षे ब्राह्मणस्य विधीयते।**
**राजन्यबन्धोर्द्वाविंशे वैश्यस्य व्याधिके ततः॥**

**14. समावर्तनसंस्कारः –**

वेदशिक्षा अनन्तरं अयं संस्कारो भवति । गृहगमनात् पूर्वमाचार्य वटु मनुशास्ति सत्यंवद, चर, मातृदेवो भव, पितृदेवो भव, आचार्यदेवो भव, अतिथि देवोभव च। अन्य अस्माकम् सुचरितानि तुर्याणस्यानि नोइतराणि पादुचादेयम्। अश्रद्धया अदेयम्। प्रियं देयम एष: आदेश:, एष उपदेश:, एषो वेदोपनिषद्, एतद् अनुशासनम्।
तदुक्तं मनुस्मृतौ –

**क्षेत्रं हिरण्यं गामश्वं क्षत्रोपानहमन्ततः।**
**धान्यं शाकं च वासांसि गुरवे प्रीतिमाहरन्॥**

**15. विवाहसंस्कारः -**

विवाह गहस्थजीवनस्य सन्तानपरम्परायाश्च वीजरूपक: । कन्याया: वरायदान विवाह त्युच्यते । स तु विवाह स्त्रीणां सर्वश्रेष्ठ: संस्कार: । पुरुषाणां कृते तु कन्यास्वीकार: " उदवाह'' रिति कथ्यते । यद्यपि पुरुषाणां कृते सर्वश्रेष्ठः न भवति तथापि तेषां संस्कारकर्मसु अन्तर्भवति । स च विवाह याज्ञवल्क्यादिस्मृतौ अष्टधा प्रदर्शित: । अस्माकमत्र आलोच्यास्यायं विषय: विवाहरिति। ब्राह्मचर्याश्रममनन्तरमेव द्विज: वेद:, व्रतानि उभयं वा समाप्य गुरवे यथाशक्तिमभिलषितं । वस्तुं दत्वा तदनुज्ञया स्नायात्। स्नानमन्तरमेव विवाह: निर्दिष्टरिति । यथा योगीश्वरेणाह –

**अविप्लुतो ब्रह्मचर्य लक्षण्यां स्त्रीयमुद्हेत्।**
**अनन्यपूर्विकां कान्ताससपिण्डां यवीयसीम्।।**

वैवाहिकी निष्ठा अत्यावश्यकी भवति। मनुराह –

**पाणिग्रहणिकाः मन्त्राः नियतं दारलक्षणम्।**
**तेषां निष्ठा तु विज्ञेया विद्वद्भिः सप्तमे पदे॥**

मनुना विवाहस्य अष्टौ भेदाः कृता:- ब्राह्मविवाहः, दैवविवाहः, आर्षविवाहः, जापत्यविवाहः, आसुविवाहः, गान्धर्वविवाहः, राक्षसविवाहः, पैशाचविवाहश्च।

**16. अन्त्येष्टिसंस्कारः -**

मरणान्तर अय सस्कारो भवति । शास्त्रानुसारं मतकशरीरं शमशाने प्रज्वाल्यते । अस्मिन् संस्कारो पुत्र एवाधिकारी स: दाहक्रिया सम्पादयति ।
एतेभ्य: षोडशसंस्कारेभ्य: भिन्नाऽपि केचन संस्कारा: धर्मशास्त्रीय निवन्धग्रन्थेष उपलब्धाः विद्यते। येषां संस्कारणां प्रचलन नूनमेव प्राचीनकाले अभवत। अधुना तु समाजे तादशाणां संस्काराणां प्रचलनं नैव अवलोक्यते । इति शम् ।।

**References**


1. नि.सि.– तृ.प.- पृ -176
2. नि.सि.– तृ.प.- पृ -176
3. नि.सि.– तृ.प.- पृ -176
4. नि.सि.– तृ.प.- पृ -176
5. या. स्मृ - 1/2
6. म. स्मृ-2/30
7. नि. सि.पृ.-185
8. या स्म-1/12
9. म. स्मृ.-2/34
10. नि. सि. पृ. - 187
11. म.स्मृ-2/35
12. या. स्मृ - 1/12
13. पा. ग. सू. - 2/1/1
14. नि.सि.पृ-187
15. नि. सि. पृ-191
16. म. स्मृ-2/36
17. या स्मृ-1/14
18. नि. सि. पृ.-192
19. नि. सि.पृ.-192
20. या. स्मृ. - 1 / 51